हणुयाद्दै विधानेन ततः षोड़श ऋत्विजः ॥
विद्यावतः सदाचारानष्टौ वा भक्तिसंयुतः ।
मध्ये वेदौ समालेख्या विचित्रैर्व्वर्णकैस्ततः ॥
पद्ममष्टदलं तत्र स्थापयेत् कलसं ततः ।
रत्नसिंहासनं रम्यं संस्थाप्य विजितेन्द्रियः ॥
तत्राधिवासनं कुर्य्यादग्न्युत्तारणपूर्व्वकम् ।
प्रतिमायां विधानेन देवीमावाहयेत्ततः ॥*॥
प्राणानायम्य मूलेन त्रिरेकाग्रेण चेतसा ।
मूलमन्त्रस्य जनकं मुनिं विन्यस्य मूर्द्धनि ॥
मुखे छन्दश्च गायत्री सीतादेवीं हृदि न्यसेत् ।
नाभौ तु विन्यसेद्ब्रह्मन् लक्ष्मीबीजं सबिन्दुकम्
पादयोश्च नमः शक्त्यै ततो विन्यस्य मन्त्रवित् ।
श्रीँ श्रीमित्यादिभिर्व्बीजैर्द्दीर्घषट्स्वरसंयुतैः ।
कृत्वा करषड़ङ्गेषु न्यासं ध्यायेत्ततो व्रती ॥*॥
चतुर्भुजां सुवर्णाभां रामालोकनतत्पराम् ।
श्रीराघवान्वितां सीतां चिन्तयेद्हृदि सर्व्वदा ॥
इति ध्यात्वा समुच्चार्य्य मूलमन्त्रं कृताञ्जलिः ।
सबिन्दुकमलाबीजं पूर्व्वमुच्चार्य्य गौतम ॥
सीतायै इति पश्चात्तु नमशब्दं वदेत् किल ।
संपूज्य प्रतिमां रात्रौ कृत्वैवमधिवासनम् ।
ब्रह्मचारी भूमिशायी तस्यां रात्रौ भवेद्व्रती ॥
तस्यां नवम्यां विधिवत् कृत्वा शौचमतन्द्रितः ।
नद्यादौ विमले स्नात्वा नित्यकर्म्म विधाय च ॥
ततस्तु प्रथमे यामे नित्यपूजाविधिं व्रती ।
कृत्वा द्वितीयप्रहरे गीतवाद्यपुरःसरम् ॥
मध्याह्नसमये भक्त्या कुर्य्यादेकाग्रचेतसा ।
आसने उपविश्यादौ मूलं विन्यस्य पूर्व्ववत् ॥
चतुरस्रञ्च षट्कोणं त्रिकोणञ्च पुरस्ततः ।
कृत्वा मण्डलमाधारं तत्र संपूज्य मन्त्रवित् ॥
मूलेन शङ्खं संस्थाप्य जलमासिच्य निर्म्मलम् ।
चिन्मयं तत्र संचिन्त्य तीर्थमङ्कुशमुद्रया ॥
आकृष्य मूलमन्त्रेण सप्तवाराभिमन्त्रितैः ।
जलैः संप्रोक्षयेद्विद्वान् सामग्रीं पूजनोचिताम् ॥
पात्राणि ताम्रहेमादिनिर्म्मितानि ततो मुने ।
पाद्यार्घप्रदानार्थञ्च मधुपर्कार्थमेव च ॥
तथैवाचमनीयार्थमेवमासादयेत् क्रमात् ।
एकस्मिन्नथवा पात्रे पाद्यादीनि प्रकल्पयेत् ॥
पात्राणीत्थं समासाद्य ततोऽन्तर्यागमाचरेत् ।
पुष्पाञ्जलिं समादाय ध्यायेद्वै प्रतिमागताम् ॥
शङ्खचक्रगदापद्मान्धारयन्तीं चतुर्भुजैः ।
महामतेस्तथा प्राज्ञो जनकस्य महात्मनः ॥
हलचालनतः साक्षादाविर्भूतां स्वतः श्रियम् ।
सीतां देवीं हृदि ध्यात्वा मूलमन्त्रेण मन्त्रवित्
पुष्पाञ्जलित्रयं देवौ प्रतिमामूर्द्धनि क्षिपेत् ।
हिरण्यवर्णां मन्त्रेण देवीमावाहयेत्ततः ॥
आवाहनादिमुद्राणामष्टकं संप्रदर्शयेत् ।
तामावाहय इत्युक्तो मन्त्रो देव्यासने मुने ॥
अश्वपूर्व्वामर्घदाने पाद्यं कांसोऽस्मि मन्त्रतः ।
चन्द्रप्रभेति मन्त्रेण दद्यादाचमनीयकम् ॥
आदित्यवर्णं इत्युक्तो मन्त्रः पञ्चामृते भवेत् ।
आप्यायस्वेति मन्त्रेण पयसा स्नापयेत्ततः ॥
दधिक्राव्णस्ततो दध्ना घृतेन घृतवत्युत ।
मधुना मधुवातेति तृचया सितया मुने ॥
स्वादुयवस्वमन्त्रेण ततस्तीर्थाम्बुभिः क्रमात् ।
उपैतु मामिति प्रोक्तः सीतायाः स्नपने मनुः ॥
स्वर्णसिंहासने रम्ये प्रतिमां स्थापयेद्व्रती ।
वासोभिः क्षुत्पिपासेति पूजयेद्विमलोत्तमैः ॥
गन्धद्वारामिति भवेद्दाने गन्धादिकस्य तु ।
मनसः काममित्याहुर्म्मन्त्रमाभरणादिके ॥
मधुपर्कं ततो दद्यात् सीतादेव्यै विधानतः ।
कस्तूरीकुसुमोपेतैः कर्पूरागुरुचन्दनैः ॥
प्रतिमां पूजयेद्भक्त्या यतः पुष्पैः स्वकालिकैः ।
सुगन्धैः कर्द्दमेनेति मन्त्रेण किल गौतम ॥
अर्च्चयेत्तुलसीपत्रैः कोमलैर्म्मञ्जरीयुतैः ।
प्रतिमां मूलमन्त्रेण शतमष्टोत्तरं जपेत् ।
ततः संपूजयेद्विद्वान् राजानं जनकं व्रती ॥”
जनकपूजामन्त्रः ।
“देवी पद्मालया साक्षादवतीर्णा यदालये ।
मिथिलापतये तस्मै जनकाय नमो नमः ॥”
महामतिपूजामन्त्रः ।
“श्रीसीताजननी मातर्म्महिषी जनकस्य च ।
पूजां गृहाण मद्दत्तां महामति नमोऽस्तु ते ॥”
शतानन्दपूजनमन्त्रः ।
“निधानं सर्व्वविद्यानां विद्वत्कुलविभूषणः ।
जनकस्य पुरोधास्त्वं शतानन्दाय ते नमः ॥”
हलपूजनमन्त्रः ।
“जीवयस्यखिलं विश्वं चालयन् वसुधातलम् ।
प्रादुर्भावयसे सीतां सीर तुभ्यं नमोऽस्तु वै ॥”*
सुभगापूजनमन्त्रः ।
“त्वयैवोत्पादितं सर्व्वं जगदेतच्चराचरम् ।
त्वमेवासि महामाया मुनीनामपि मोहिनी ॥
त्वयायत्ता इमे लोकाः श्रीसीतावल्लभा परा ।
वन्दनीयासि देवानां सुभगे त्वां नमाम्यहम् ॥*॥
ततोऽष्टदलमध्यस्थजयाद्या भक्तितः क्रमात् ।
संपूजयेद्विशुद्धात्मा गन्धपुष्पाक्षतादिभिः ॥
वह्निर्म्मण्डलवर्त्तिन्यः षोड़शाद्यास्तु देवताः ।
अणिमाद्यभिधाः पूज्या वह्निः सर्व्वा ऋचस्ततः ॥
संपूज्यावरणाण्येवं मुख्यदेव्यास्ततो व्रती ।
दशाङ्गैर्गुग्गुलैर्द्द्याद्धूपमापः स्रतंविभिः ॥
दीपन्तु साज्यवर्त्तीभिराद्रं पुष्करिणामिति ।
नैवेद्यं घृतपक्वान्नैर्नानाव्यञ्जनसंयुतैः ॥
प्रदद्यात् पायसाद्यैरप्याद्रां यःकरिणामिति ।
राज्ञ्यै च गुड़लड्डुकान् महामत्यै निवेदयेत् ॥
ताम्बूलञ्च ततो दद्यात् कर्पूराद्यैः सुसंयुतम् ।
साङ्गतासिद्धये देया यथाशक्ति च दक्षिणा ॥
नीराजयेत्ततो देवीं प्रणमेत्तदनन्तरम् ।
तामाह्वय च मन्त्रेण पुष्पाञ्जलिमथार्पयेत् ॥*॥
मूलेन हावयेत् विप्रैरष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि पायसं शर्करायुतम् ॥
आहुतीनां ततः पश्चान्मुने कुर्य्यात् प्रदक्षिणाम्
पुनः पुष्पाञ्जलिं दद्यात् सीतामूर्द्धनि भक्तितः
आदाय तुलसीपत्रं पुष्पं यत्किञ्चिदेव वा ।
सीताङ्घ्रिपङ्कजाद्भक्त्या तदाकारं विभावयन् ॥
इति नम्रशिरा भूत्वा रोपयेत्तत् स्वमूर्द्धनि ।
ततः सीतापदाम्भोजद्वयं संस्मृश्य मङ्गलम् ॥
कराञ्जलिपुटं बद्ध्वा प्रार्थयेद्रामवल्लभाम् ।
भक्त्या परमया ब्रह्मन् ताभिः कोमलशुक्तिभिः

दुरन्तसंसारसमुद्रमग्नं
सीते शरण्यां शरणागतं त्वाम् ।
उद्धारयस्वाशु हतं भयैत-
द्धृतं ततो देवि मयि प्रसीद ॥

संप्रार्थ्य जानकीमेवं दण्डवत् प्रणमेत् पुनः ।
पुष्पाञ्जलिं पुनर्द्दत्वा स्तुवीत परमेश्वरीम् ॥

नीलनीरजदलायतेक्षणां
कौशलेशभुजसावलम्बनाम् ।
सानुरागहरिमेवमीक्षतीं
भावये मनसि रामवल्लभाम् ॥
मन्दहंसगतिगाञ्च कृशाङ्गीं
कामकान्तिपरिभूतचन्द्रिकाम् ।
ताड़कारिसहप्रेमविमग्नां
भावये मनसि रामवल्लभाम् ॥
कुन्तलालककपोलमाननां
राहुवक्त्रगसुधासमद्युतिम् ।
वाससा पिदधतीं ह्रियाकुलां
भावये मनसि रामवल्लभाम् ॥
कायवाङ्मनसगोःपतिर्व्यधात्
स्वप्नजाग्रतिषु राघवेश्वरः ।
शिवविरिञ्चिभिरङ्घ्रिवन्दितां
भावये मनसि रामवल्लभाम् ॥
भक्तैकगम्यां प्रकृतेः पराञ्च
चित्ते भृशं लोकनमस्कृताञ्च ।
भूवायुवह्निवननाकसंस्थितां
विभावये चेतसि रामवल्लभाम् ॥
इन्द्ररुद्रधनदानुपालकैः
सद्विमानगणमास्थितैर्द्दिवि ।
पुष्पवर्षमनुसंस्तुतशीलां
भावये मनसि रामवल्लभाम् ॥
ध्येयमानममरैश्च स्वरूपां
वामधामतनुनिर्ज्जितहेमाम् ।
फुल्लनीरजविभावराननां
भावये मनसि रामवल्लभाम् ॥
सञ्चयैर्द्दिवि सदां विमानगै-
र्व्विस्मयाकुलमनोभिरीक्षिताम् ।
तेजसापि दधतीं सदा दिशं
भावये मनसि रामवल्लभाम् ॥
एतदष्टकमनिष्टहानिकृद्
यः पठेदथ शृणोत्यहर्म्मुखे ।
अन्तरापरहिता तु मैथिली
तस्य भक्तिमतुलां प्रयच्छति ॥

स्तुत्वेत्थं जानकीदेवीं गीतवाद्यादिभिर्व्रती ।
रात्रौ जागरणैः सर्व्वां तां रात्रिमपवाहयेत् ॥
ततः प्रातर्द्दशम्याञ्च पूर्व्वोक्तविधिना द्विज ।
प्रतिमां पूजयित्वादा वा चार्य्यं पूजयेत्ततः ॥
तस्मै सोपस्करां दद्यात् सवत्सां गां पयस्विनीम्
दक्षिणाञ्च यथाशक्ति ततः पूर्णाहुतिं चरेत् ॥
पूर्णाहुतिविधानेन कृत्वा च प्रतिमादिकम् ।